## श्रीत्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिताचार्यविरचिता प्रमेयनवमालिका

श्रीशप्रीत्यै प्रजातः सुमहितमहिमा श्रीहनूमान्निदेशात्
रामस्योल्लङ्घिताब्धिः सहरिरथ गतः सेतुना पिष्टदुष्टः ।
भूभृन्नी रावणारिं पुरगमुरुदयं पूजयित्वा ससीतं
पश्यन् किम्पूरुषे तं सततमपि महान् प्राणमुख्योऽवतान्माम्॥१॥

भीमोऽभूद्यो न भेद्यश्चकितरिपुकृतापत्प्रणोदी सलीलं
रक्षोघ्नः प्राप्तकृष्णो मखकृदुत वने दुष्टहा कीचकघ्नः ।
हत्वा दुर्योधनादीन् स्वपदमुपगतो यद्द्विषः क्रोधतंत्राः
भूत्वा भूमौ कुशास्त्रं व्यधिषत मणिमत्पूर्वकाः पातु सोऽस्मान्
॥२॥

अज्ञानोत्सादनार्थं सुरवरवचसा सूचितो रूप्यभर्त्रा
जातो मध्यालयार्याद्गुरुमतितपसो वासुदेवाभिधानः ।
गोदात्रे मोक्षदाता रजतपतिपदासेवको भूतभर्त्रा
मान्यः प्राणः कुलस्थैरपि निजसहजातर्पितः प्रीयतां मे ॥३॥

आनन्दं मन्दहासामृतरसकलया सन्दधानः प्रजानाम्
आस्येन्दोः शोभमानैरपि कलवचनैर्बाललीलाविलासैः ।
गोपुच्छालम्बनाद्यैर्वृषपतिविहितापत्प्रणोदी प्रणुद्यात्
अज्ञानाद्यापदं मे स्वयमिव भगवान् वासुदेवोऽसुदेवः ॥४॥

एकाकी योजनाभ्यां व्यवहितमगमद्यस्त्रिवर्षोऽमरौको
यो लाल्यो लोकमात्रा स्वलिपिपरिचये तातविस्मेरताकृत्।

प्राज्ञंमन्यं शिवाख्यं परिषदि जितवान् शाखिनामार्थमूचे
दुर्गं पित्रोपनीतः सुरवरमहितो मह्यतां मे वचोभिः ।।५।।

पायान्मां यो भुजङ्गं सदरिमदमयद्द्रागुपाध्यायसेवी
विश्वेभ्यो वेगदूरप्लवनजवनियुद्धादिवीर्यातिशायी ।
येनास्ता मूढशङ्का श्रुतिशुचिवचसाऽलं गुरोः शीर्षशूला
सख्युर्नारायणज्ञोऽथ य उपनिषदं व्याख्यतास्मै सुरार्थ्यः ।।६।।

संन्यासे बद्धबुद्धिः कृतहरिनमनः पार्थपूज्यं यतिं प्राक्
प्राज्ञं गुर्वाज्ञयाऽलं सुगुणहरिविदं सत्तपस्तृप्तदेवम्।
प्राप्तं सर्वज्ञशिष्याख्यवरमुपगतो द्विःस्वतातं निषेद्धुं
प्राप्तं चानुत्तरं यो व्यधित सहजवान्मातरं चावतान्माम् ।।७।।

पूर्णप्रज्ञाख्य आसीद्यतिकुलतिलको यः शुभाचार ईश–
प्रत्तोस्मा ईश्वराज्ञागतसुरसरिति स्नानकृज्जैत्रपत्रः ।
दुष्पद्यच्छिच्चलोके प्रवचनचतुरः सत्पुराणेतिहास–
स्योक्तौ मेधाप्रदर्शी दिशतु शुभदृशं मह्यमृज्वग्रणीः सः ।।८।।

साक्षादानन्दतीर्थोऽनुमितिभिरुरुजिद्योऽनुमातीर्थनामा
बुद्ध्यब्धिं वादिसिंहं सपदि विजितवान् दुष्टभाष्यापनोदी ।
अच्छेद्योक्तिः प्रमोदं पितुरपि कृतवान्नर्मगर्भं गुरूक्तो
भाष्यं कर्तुं ह्यवोचत् प्रियसखयतये सूत्रभावं स माऽव्यात्।।९।।

याम्याशां यान् प्रभोक्ता बहुफलसमितेः क्षीरिणीं प्रेक्ष्य यान्तीं
स्यानन्दूरं च दैत्यं सपदि विजितवान् फाल्गुणं तीर्थमाप्तः ।
सेतुं चात्रापि हास्यं खलमथ कृतवान् सर्वजिद्रङ्गनाथम्
नत्वा यान्विश्ववन्द्यो ह्युपनदि विभुधौकस्यवेन्मां स धन्यः
।।१०।।

विश्वादीनां शतार्थप्रवचनचतुरो दानसूक्तार्थवादी
दिव्यज्ञानप्रकाशी सकलजिदखिलज्ञाभिधः प्राप्तरूप्यः ।
भीमो वा भीमसन्धः खलकुलदमने गीतिकाभाष्यकारी
गुर्वर्ची यानुदीचीं मम मनसि लसेत्तीर्थशोधी स मध्वः ।।११।।

गङ्गातारी सुकर्मोपगतबदरिकान्तोऽत्र नारायणं यो
नत्वैकान्ते समुद्यत्प्रवचनकृदथो सत्तपाः कृष्णनुन्नः ।
आप्तेभ्यः कार्यलेखी स्वमनुगतनिजप्रेरकः पाणिमात्रान्–
मारुत्याभः प्रपश्यन् हरिमपि गिरिणा सार्धमृद्ध्यै स मे स्यात्।।
।।१२।।

योऽपश्यत् स्वाश्रमाग्र्यं मुनिमहितगुणो दिव्यसालं च चित्रं
तत्रर्षीणां समाजे हरिमपि मुनितः सत्यवत्यां प्रजातम्।
कर्तारं भारतादेर्भरतवरगुरुं ब्रह्मसूत्रस्य चाहो
निर्दोषं नित्यपूर्णागणितगुणमसौ प्रीयतां मे स चेशः ।।१३।।

सर्वाङ्गैः सर्ववन्द्यैर्विमलकुवलयश्यामलैः शोभमानं
सज्ज्ञानानन्दतेजः प्रवरगुणमयैः पूर्णलावण्यरूपैः ।
बिम्बोष्ठं पद्मपादं शुभकपिशजटं सैणचर्माणमीशं
दृष्ट्वा नत्वोपगूढः स गुरुरवतु नः सूपविष्टो मुनीष्टः ।।१४।।

शिष्यं व्यासस्य नारायणमथ च गतं सर्वहेतुं सुमत्स्यं
साश्वास्यं कूर्मकोलौ नृहरिमथ मनुं वामनं बुद्धरामौ ।
व्यासं काकुत्स्थकृष्णावतिचिरमितरानन्दनं कल्कियज्ञौ
सिद्धेशं नौमि धन्वन्तरिवरवनिताख्यं तमेनं स्मरन्तम् ।।१५।।

दत्तात्रेयं कुमारं हृदि दधदृषभं हंसकृष्णौ हरिं तं

धार्मं नारायणाख्यं सदशशतसहस्राद्यनन्तावतारम्।
तन्नुन्नस्तत्प्रसूक्तैर्वरमुचितनरैरेष सेव्यत्वमाप्तः
कृच्छ्राद्यात्रोन्मुखो मे स गतिरपि हरिर्व्यासनारायणाख्यः॥१६॥

लब्ध्वाऽनुज्ञां मुकुन्दात्स्वजनमुपगतोऽनेकभिक्षाप्रभोक्ताऽ–
तुल्यं भाष्यं च कुर्वन् स्वसमगुणगणं संप्रयातः पुनर्यान्।
षट्शास्त्राशेषशाखास्वखिलविजयवान् शोभनं सूरिवर्यं
शिष्यं लब्ध्वाऽतिजैत्रं पुनरपि विविधान् प्राप्तरूप्यो गतिर्मे
॥१७॥

सख्ये व्याख्याय भाष्यं कलिमलमपनीयाच्युतज्ञाय चालं
कार्ष्णीमर्चामचाल्यां त्रिदशकतरुणैर्लीलयाऽऽनीय रूप्ये ।
आस्थाप्योदस्य यज्ञप्रतिहतिनिरतान् कारयित्वास्ययज्ञं
व्यासं नत्वा पुनश्च प्रतिगतरजतः सम्प्रसीदेत् स मध्वः॥१८॥

सागस्त्वादीशदेवं परवशखननं यो व्यधादप्लवः स्वैः
गङ्गातारी स्वनीत्या वशितयवनराड्वर्त्मनि क्वापि चोरान्।
हन्तुं यातान् मिथोऽहन् क्वचिदपि निजशिष्येण चाद्रावयद्द्राक्
योगेनाभूच्छिलाभः क्वचिदपि सगणस्तं महेक्षं दिदृक्षे ॥१९॥

दैत्यव्याघ्रोपघाती नरसखकरतो लब्धगौरोपलार्चो
व्यासाज्ञाभृत् सुतर्ता लघु सुरसरितो वारिसंस्तंभयोगात्।
भित्त्वा भूमिं द्युनद्या मठमुपगतया वन्दितो मूर्तिमत्या
यूनोऽनेकान् विजिग्ये युगपदपि गतान् यः सलीलं तमीढे॥२०॥

स्वर्गाह्वोक्तिप्रखण्डी सकलसमयजिद् व्याख्ययाऽभात्पुराऽऽजौ
शिष्याणामायुधानि प्रकटयति पुरा पूजितः शूलिनाऽभूत्।

प्रत्यक्षेण क्वचिद्यो दशशतगुरुरम्भापयोभुक् क्षणाद् सद्-
गानात् पुष्पादिकारीत्यभिहितचरितः यः शुभैस्तं प्रपद्ये ।।२१।।

व्याख्यां श्रुत्वा मुनीभ्योऽभ्यदित समयतो यस्य लभ्यं फणीन्द्रो
वैकुण्ठं हेमनामामणिमयसदनं श्रीशधामास्तदोषम्।
सायुज्याद्याप्तसौख्यैरखिलविषयिभिः सुन्दरीभोगभाग्भिः
ब्रह्माद्यैर्नाथदृग्भिर्विलसितमतुलं सोऽनुगृह्णातु नोऽलम् ।।२२।।

नानादुर्नीतिवादैर्विहितमुरुमदं मायिभूतासुरेन्द्रैः
योऽयं वेदान्तिसिंहो व्यजयत कुरवं पुण्डरीकं चकाण्डम्।
विश्वाश्चर्यप्रकारं प्रवचनमकरोत् छन्दसां यत्स्पृधाऽन्यः
तत्कुर्वन् हास्य आसीद द्विजवरनिकरे स्याम तद्दासदासाः।।२३।।

पद्माख्यं सिन्धुराजं प्रियजनपरमागस्कृतं प्राप्य भीतेः
अन्यान्कुर्वाणमग्रे सपदि निजगृहे गोगणैर्मध्वपार्थः ।
यो यद्दासोक्तिबाणैर्विदलितहृदया दुद्रुवुर्मायिदैत्याः
विश्वज्ञाख्यो हरिर्यो जगति विजयते स प्रदद्याज्जयं नः ।।२४।।

श्रीकान्ताङ्घ्रि प्रसंगादधिकशुचितमो यान् यथा गाङ्ग ओघो
राज्ञा संवंदिताङ्घ्रिः सकलगुणगणोपेतपादादिकान्तः ।
सर्वेषां दर्शनीयो लिकुचकुलभवो वेदशास्त्राादिवेदी
प्रापायुग्विक्रमार्यो यमखिलगुरुमानन्दतीर्थं प्रवन्दे ।।२५।।

लब्धग्रन्थःस्तुतोऽलं लिकुचकविवरेणेह निन्ये दिनानि
श्रीभर्तुः प्रीतिवृद्ध्यै विविधशुभकृतीः केवलं यस्तु कुर्वन्।
निर्लेपो दग्धकर्मा मतिकृतिकरणैर्लोकशिक्षां च कर्तुं
दैवैर्वृष्टामृतार्चः प्रवचनचतुरो मे प्रवक्तृत्वदः स्यात् ।।२६।।

स्नातो देवाभिषेक्ता सदरिदरधरस्तन्त्रशास्त्रानुवृत्त्या
सम्यक् सम्पूज्य विष्णुं वरतुलसिकया दर्शनीयोऽथ भुक्त्वा ।
नानालोकाभिनन्दी गुरुरथ विलसद्व्याख्यया सान्ध्यकृत्यं
कृत्वा गोविन्दलीलाकथक उरुकथां वैष्णवीं वाचयेन्नः ।।२७।।

मान्योपन्यासधन्यो हरिरखिलगुणो ब्रह्म वेदैकवेद्यः
कर्ता विश्वस्य मोक्षं शुभसुखविषयं राति भक्तेभ्य इत्थम्।
सत्तर्कैः साधयित्वा श्रुतिशतसहितैः सूरिसूनुं विजित्य
व्याख्याता तस्य पूर्णप्रमतिरनुदिनं व्याख्यया प्याययेन्माम्
।।२८।।

साम्नस्त्रैविक्रमार्याद् व्यरचयदणुभाष्यं शतग्रन्थकर्ता
सोदर्यं स्वं विरक्तं यतिमकृत महासद्गुणं विष्णुतीर्थम्।
वादीन्द्रं पद्मनाभं प्रियमथ च परान् सद्गुणान् श्लाघ्यशिष्यान्
योऽनेकान् सद्गृहस्थानपि स विजयते कण्वतीर्थान्तिकस्थः
।।२९।।

संस्तव्यो वेदमानं समवितुमतनोदोषधीर्यः क्षणान्ते
दीप्तांगुष्ठः शिलानीः श्रुतिविवरणकृद्वन्दितः स्तम्भिताब्धिः ।
अङ्गुल्या गण्डवाटावतुलबलचणौ चालने यस्य नालं
प्राग्वाटो वा वटूढो मम मनसि लसेदप्यलाव्यैकलोमा ।।३०।।

पारन्तीशाभिनन्दी सपदि च सरितामन्तरेऽवर्षयद्यो
ग्रीष्मे मित्रीचकाराप्यहितमथ गतो वैद्यनाथं स्वभूत्यै ।
छन्दःखंडार्थवादी जितकुमतिकुलो दुर्जनेर्ष्याभ्युपेक्षी
लघ्वन्नं बृंहयेदत्त्यपि बहु धनिनामल्पकल्पेन तुष्येत् ।।३१।।

वृष्ट्यादीनां नियन्तेत्यभिहितचरितः सर्वगीर्वाणरत्नैः
गन्धर्वैर्गीयमानो द्युसदसि सकलैः कौतुकान्नम्यमानः ।
दृष्ट्वा संस्तूयमानः सुरतरुकुसुमैरार्य आकीर्यमाणो
मध्वो जाज्वल्यतेऽसौ जगति विजयते सत्सभामङ्गलाय।।३२।।

दशप्रमतिविक्रमं बहुविधात्मना हेमवत्
सुमध्वविजयाभिधं व्यधित भावदीपाह्वयम्।
प्रमेयनवमालिकां पुनरिमां च दक्षाश्रिताम्
सतां श्रवणभूषणं व्यदधदेष नारायणः ।।३३।।

इति श्रीमत्कविकुलतिलक श्रीत्रिविक्रमपण्डिताचार्यसुत
श्रीमन्नारायणपण्डिताचार्यविरचिता प्रमेयनवमालिका समाप्ता।।